## प्रथमाध्यायस्य द्वितीयः पादः

### गाङ्कुटादिभ्योऽञ्णिन्ङित्। (१/२४६१)

अतिदेशोऽयम्। गाङ इति [1]इङादेशो (२.४.४९/२४५९) गृह्यते, न 'गाङ गतौ' (धा. पा. ९५०) इति, इकारस्यानन्यार्थत्वात्। कुटादयोऽपि[2] 'कुट कौटिल्ये' (धा. पा. १३६७) इत्येत[3]दारभ्य यावत् 'कुङ शब्दे' (धा. पा. १४०२) [4]इति। एभ्यो गाङ्कुटादिभ्यः परे अञ्णितः प्रत्यया ङितो भवन्ति [5]ङिद्वद् भवन्ति इत्यर्थः। गाङः—अध्यगीष्ट (६.४.६६/२४६२)। अध्यगीषाताम्। अध्यगीषत। कुटादिभ्यः[6]—कुटिता[7] (१.१.५/२२१७)। [8]कुटितुम्। कुटितव्यम्। उत्पुटिता। उत्पुटितुम्। उत्पुटितव्यम्। अञ्णित् इति किम्? उत्कोटयति (३.१.२६/२५७६)। [9]उच्चुकोट (३.४.८२/२१७३)। उत्कोटकः[10] (३.१.१३३/२८९५)। उत्कोटो[11] (३.३.१८/३१८४) वर्तते।

[१८] व्यचेः कुटादित्वमनसीति वक्तव्यम्।

[12]विचिता। विचितुम्। विचितव्यम्। अनसि इति किम्? उरुव्यचाः[13] (ऋ.१.१०४.९)॥

### विज इट्। (२/२५३६)

'ओविजी भयचलनयोः' (धा.पा. १२९०), अस्मात्[14] परः इडादिः[15] प्रत्ययो [16]ङिद्वद् भवति। उद्विजिता[17]। उद्विजितुम्। उद्विजितव्यम्। [18]इट् इति किम्? [19]उद्वेजनम् (३.३.११३/२८४१)। उद्वेजनीयम् (३.१.९६/२८३४)॥

### विभाषोर्णोः। (३/२४४७)

इट् इति वर्तते। [20]'ऊर्णुञ् आच्छादने' (धा. पा. १०३९), अस्मात्[21] परः इडादिः[22] प्रत्ययो विभाषा[23] ङिद्वद् भवति। प्रोर्णुविता। प्रोर्णविता[24]। इट् इत्येव। प्रोर्णवनम्[25]। प्रोर्णवनीयम्॥

### सार्वधातुकमपित्। (४/२२३४)

सार्वधातुकं यद्[26] अपित् तन् ङिद्वद्[27] भवति। कुरुतः[28]। कुर्वन्ति। चिनुतः। चिन्वन्ति। सार्वधातुकम् इति किम्? कर्ता[29]। कर्तुम्। कर्तव्यम्। अपित्[30] इति किम्? करोति। करोषि[31]। करोमि।

### असंयोगाल्लिट् कित्। (५/२२४२)

अपित् इति[32] वर्तते। [33]असंयोगान्ताद् धातोः परो [34]लिट् प्रत्ययः अपित् किद्[35] भवति। [36]बिभिदतुः। बिभिदुः। चिच्छिदतुः। चिच्छिदुः। ईजतुः[37]। ईजुः। असंयोगात् इति किम्? सस्रंसे। [38]दध्वंसे। अपित् इत्येव[39]। बिभेद[40]॥

1. गाङादेशो ह. 2. अपि नास्ति क. ड. 3. इत्यत आरभ्य ड. 4. इति एतेभ्यः ड. फ. 5. ङिद्वद् नास्ति क. 6. कुटादिभ्यम् ग. 7. उत्कु⁰ क. ड. ह. 8. नास्ति ग. 9. कुरुतः ब, नास्ति ग. 10. नास्ति ग. 11. उत्कटो ब. 12. उद्वि⁰ फ. ग. ह. 13. उरुचाः फ. 14. धातोः इत्यधिकम् ग. 15. इडादिप्रत्ययः क. 16. ङिद् फ. 17. उद्विजितौ ह. 18. उसिनि निम् ग. 19. नास्ति फ. ई, उद्विननीयम् ग, उद्वेनकः ह. 20. ऊर्ण ग. 21. अन्यात् परः ग. 22. इडादिप्रत्ययः क. ह. 23. विभाषा नास्ति फ. 24. प्रोर्णुवितुम्। प्रोर्णवितुम् फ. ग. ह, प्रोर्णवितव्यं ग. ह. 25. प्रोर्णवनीयः ह. 26. यत् नास्ति ह. 27. ङित् फ. 28. कुरुतः, कुर्वन्ति नास्ति ह. 29. हर्ता अ. क, कर्तुम् नास्ति अ. क. ड. 30. अपीत् ग. 31. करोषि करोमि नास्ति क. ड. 32. इत्येव क. 33. असंयोगात् ग. 34. लिट्प्रत्ययोऽपि ह. 35. किद्वत् अ. 36. नास्ति ग. 37. ईजतुः ईजुः नास्ति ग. 38. दध्वंसि ग. 39. इति किम्? ग. 40. बिभेदिथ ब. फ. ह.